## छदिरुपधिबलेर्ढञ्। (१३/१६७५)

[1]छदिरादिभ्यः शब्देभ्यः ढञ् प्रत्ययो भवति 'तदर्थं विकृतेः प्रकृतौ' (५.१.१२/१६७४) इत्येतस्मिन् [2]विषये। छस्यापवादः। छादिषेयाणि तृणानि। औपधेयं दारु। [3]बालेयास्तण्डुलाः। उपधिशब्दात् स्वार्थे प्रत्ययः। उपधीयते इति उपधिः रथाङ्गम्। औपधेयम[4]पि तदेव दारु॥

## ऋषभोपानहोर्ञ्यः। (१४/१६७६)

ऋषभ उपानह् इत्येताभ्यां [5]ञ्यः प्रत्ययो भवति 'तदर्थं विकृतेः प्रकृतौ' (५.१.१२/१६७४) इत्येतस्मिन् [6]विषये। छस्यापवादः। आर्षभ्यो [7]वत्सः। औपानह्यो मुञ्जः। चर्मण्यपि प्रकृतित्वेन विवक्षिते पूर्वविप्रतिषेधा-दयमेवेष्यते। औपानह्यं चर्म॥

## चर्मणोऽञ्। (१५/१६७७)

चर्मणः इति षष्ठी। चर्मणो या विकृतिः तद्वाचिनः प्रातिपदिकात् अञ् प्रत्ययो भवति 'तदर्थं विकृतेः प्रकृतौ' (५. १. १२./१६७४) इत्येतस्मिन् [8]विषये। छस्यापवादः। [9]वार्ध्रं चर्म। वारत्रं चर्म॥

## तदस्य तदस्मिन् स्यादिति। (१६/१६७८)

तद् इति प्रथमा समर्थविभक्तिः, अस्य इति प्रत्ययार्थः, स्यात् इति प्रकृतिविशेषणम्। इतिकरणो विवक्षार्थः। एवं [10]द्वितीयेऽपि वाक्ये। सप्तम्यर्थे [11]तु प्रत्यय इत्ये[12]तावान् विशेषः। प्रथमासमर्थात् षष्ठ्यर्थे सप्तम्यर्थे च यथाविहितं प्रत्ययो भवति, यत्तत् प्रथमासमर्थं [13]स्याच्चेत् तद् भवति। इतिकरणः [14]ततश्चेद् विवक्षा। [15]प्राकार आसामिष्टकानां स्यात् [16]प्राकारीया इष्टकाः। प्रासादीयं दारु। सप्तम्यर्थे खल्वपि – [17]प्राकारोऽस्मिन् देशे स्यात् [18]प्राकारीयो देशः। प्रासादीया भूमिः।

स्यादिति सम्भावनायां लिङ्, सम्भावनेऽलम् (३. ३. १५४/२८११) इति चेद् इत्यादिना। इष्टकानां बहुत्वेन [19] तत् सम्भाव्यते [20]प्राकार आसामिष्टकानां स्यात् इति। [21]देशस्य च गुणेन सम्भाव्यते [22]प्रासादोऽस्मिन् देशे स्यात् इति। प्रकृतिविकारभावस्तादर्थ्यं चेह न विवक्षितम्। किं तर्हि, योग्यतामात्रम्। तेन पूर्वस्यायमविषयः। द्विस्तद्ग्रहणं न्यायप्रदर्शनार्थम्, अनेकस्मिन् प्रत्ययार्थे प्रत्येकं समर्थविभक्तिः सम्बन्धनीया इति।

[23]अथेह कस्मान् न भवति, प्रासादो देवदत्तस्य स्यात् इति? गुणवानयं सम्भाव्यते प्रासादलाभोऽस्य [24]इति। इतिकरणो विवक्षार्थः इत्युक्तम्॥

---

1. छदिर् उपधि बलि इत्येभ्यः प्रातिपदिकेभ्यः क. 2. अर्थे फ, विषये अर्थे ह. 3. बल्यर्थम् इत्यधिकम् फ. 4. इति ब. फ. 5. शब्दाभ्यां इत्यधिकम् फ. ह. 6. अर्थे फ. 7. वधः ह. 8. अर्थे क. फ. ह. 9. वाध्र्यं इदं इत्यधिकम् ह. 10. द्वितीयवाक्ये ह. 11. अपि फ. 12. एतावान् नास्ति क. 13. स्याच्चै-तत् ह. 14. ततश्चेति विवक्षार्थः क. 15. एष इत्यधिकम् ड, प्रासादः इ. क. 16. प्रासादीयाः इ. क. 17. प्रासादः क. 18. प्रासादीयः क. 19. बहुत्वेति फ, तत् नास्ति ग. 20. एष इत्यधिकम् ड. 21. देश-गुणेन ह गुणवादेन क. 22. एष इत्यधिकम् क. ड. फ. 23. अथ नास्ति फ. 24. इति नास्ति ह.